# ग्राह्कहिताय ग्रहकसुखाय।

## अवबोधनम्।

**अ. एकवाक्येन उत्तरत।**

*१. कर्कटिकानां मूल्यं **कियद्** आसीत्?

**उत्तर:** कर्कटिकानां मूल्यं **अशीतिरूप्यकाणि किलोपरिमितस्य कृते** आसीत्।

२. शाकविक्रेतु: आपणे शाका: **कीदृशा:** सन्ति?

**उत्तर:** शाकविक्रेतु: आपणे शाका: **महार्घा:** सन्ति।

३. **किं** न विधियुक्तम्?

**उत्तर:** **परिमाणानां स्थाने पाषाणखण्डानाम् उपयोजनं** न विधियुक्तम्।

४. **क:** त्रुटित:?

**उत्तर:** **तुलाया: दण्ड:** त्रुटित:।

५. शाकविक्रेता परिमाणस्थाने **किं** योजयति?

**उत्तर:** शाकविक्रेता परिमाणस्थाने **पाषाणखण्डं** योजयति।

६. मधुरया **क:** न श्रुत:?

**उत्तर:** मधुरया **ग्राहकमञ्च:** न श्रुत:।

**ब. उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

१. ________ समीपे परिमाणानि न __________।

(तस्मै / तव) (सन्ति / गणयन्ति)

**उत्तर:** **तव** समीपे परिमाणानि न **सन्ति**।

२. अधुना __________ इति तु भवती ________ एव।

(ग्रीष्मकाल: / परीक्षाकाल:) (जानन्ति / जानाति)

**उत्तर:** अधुना **ग्रीष्मकाल:** इति तु भवती **जानाति** एव।

३. __________ अवलोकितं ________ ।

(न / आम्) (मया / अहम्)

**उत्तर:** **न** अवलोकितं **मया**।

४. शाकविक्रय-अनुज्ञापत्रादपि __________ वञ्चितो ________ । (माता / त्वं) (भवसि / भवामि)

**उत्तर:** शाकविक्रय-अनुज्ञापत्रादपि **त्वं** वञ्चितो **भवसि**।

**क. क: कं वदति तद् लिखत।**

१. "महार्घा: शाका: तवापणे।"

**उत्तर:** **माता शाकविक्रेतारं वदति।**

२. **"पञ्चसप्ततिरूप्यकै: ददामि।"**

**उत्तर:** शाकविक्रेता मातरं वदति।

३. "नैष सम्यक् तोलयति।"

उत्तर: **मधुरा मातरं वदति।**

४. "सत्यं वदसि।"

उत्तर: **माता मधुरां वदति।**

५. "तव समीपे ISI चिह्नाङ्कितानि परिमाणानि न सन्ति?"

उत्तर: **माता शाकविक्रेतारं वदति।**

६. "तुलाया: दण्डोऽपि त्रुटित:।"

उत्तर: **माता शाकविक्रेतारं वदति।**

**ङ. सत्यं वा असत्यं वा तद् लिखत।**

१. कर्कटिकानां मूल्यं किलोपरिमितस्य कृते पञ्चसप्ततिरूप्यकाणि अस्ति।

उत्तर: **असत्यम्।**

२. शाकविक्रेता शाकं सम्यक् तोलयति।

उत्तर: **असत्यम्।**

३. शाकविक्रेता परिमाणस्थाने पाषाणखण्डं योजयति।

उत्तर: **सत्यम्।**

४. परिमाणानां स्थाने पाषाणखण्डानामुपयोजनं विधियुक्तम्।

उत्तर: **असत्यम्।**

५. तुलाया: दण्ड: त्रुटित: अत: वस्तूनां तोलनं सम्यग् न भवति।

उत्तर: **सत्यम्।**

## इ. योग्यं वा अयोग्यं वा इति लिखत।

१. शाकविक्रेता तोलनार्थं सम्यक् परिमाणं न योजयति।

उत्तर: **अयोग्यम्।**

२. शाकविक्रेता परिमाणस्थाने पाषाणखण्डं योजयति।

उत्तर: **अयोग्यम्।**

३. तुलाया: दण्ड: त्रुटित: अत: तोलनं सम्यग् न भवति।

उत्तर: **अयोग्यम्।**

४. यदि माता ग्राहकमञ्चम् अभिगच्छति तर्हि शाकविक्रेता अनुज्ञापत्राद् वञ्चित: भवति।

उत्तर: **योग्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. परिमाणस्थाने पाषाणखण्डानाम् उपयोगविषये भवत: किं मतम्?

उत्तर: 'ग्राहकहिताय ग्राहकसुखाय।' या पाठात मधुरा नावाची एक लहान मुलगी, तिची आई आणि एक भाजीविक्रेता यांच्यातील संवाद देण्यात आलेला आहे. हा संवाद ग्राहक म्हणून आपल्याला असणाऱ्या हक्कांविषयी आपले प्रबोधन करतो. विक्रेत्यांकडून होणाऱ्या फसवणुकीपासून आपले संरक्षण करण्यात हे हक्क आपली मदत करतात. 'ग्राहकपञ्चायत' म्हणून ओळखल्या जाणाऱ्या ग्राहकमञ्चाबद्दलही हा पाठ आपल्याला महत्त्वाची माहिती देतो.

मधुरा आणि तिची आई भाजीबाजारात गेल्या होत्या. काकड्या विकत घेत असताना मधुराच्या असे निदर्शनास आले, की तो भाजीवाला ISI ची खूण असलेली वजने वापरण्याऐवजी वजन म्हणून दगड वापरत होता. शिवाय त्याच्या तराजूची दांडीदेखील तुटलेली असल्याचे तिच्या आईच्या लक्षात आले. ग्राहकांची फसवणूक करण्यासाठी विक्रेते अशा प्रकारचे गैरप्रकार करत असतात. उदा. जेव्हा आपण एक किलो भाजी किंवा फळे मागतो, तेव्हा विक्रेते वजन म्हणून दगडांचा उपयोग करतात, पण या दगडांचे योग्य वजन किती आहे, हे मोजलेले नसते आणि त्यामुळेच आपण एक किलो वजनाचे सामान न घेताच एक किलोचे पैसे देतो. अशा चुका टाळण्यासाठीच 'इंडियन स्टॅन्डर्ड्स इन्स्टिट्यूशन' (ISI) ही संस्था ISI खूण असलेली वजने पुरवते. ही वजने योग्य मोजमापाची हमी देतात. तुटलेली साखळी, लपवलेले चुंबक ही गैरप्रकारांची इतर काही उदाहरणे आहेत. परंतु, अशा गैरप्रकारांना कायद्याने प्रतिबंध करण्यात आलेला असून ग्राहकांच्या हक्कांच्या संरक्षणासाठी ग्राहकमंच आणि ग्राहकपंचायत स्थापन करण्यात आली आहे. म्हणूनच ग्राहकांनी जागरूक असणे आणि आपल्या हक्कांसंदर्भात संपूर्ण ज्ञान मिळवणे आवश्यक असते, ज्यामुळे ते फसवणुकीची माहिती ग्राहकमञ्चाला पुरवू शकतात.

थोडक्यात, वजनांऐवजी दगडांचा वापर करणे हे बेकायदेशीर आणि अनैतिक आहे, कारण यामुळे ग्राहकाला जास्त किंमत मोजूनही कमी उत्पादन मिळते. म्हणूनच, ग्राहकांनी अशा वस्तू खरेदी करताना जागरूक असणे आवश्यक आहे.

## पृथक्करणम्।

१. घटनाक्रमानुसारं वाक्यानि संयोज्य पुनर्लिखत।

i. शाकविक्रेता कर्कटिकाः पञ्चसप्ततिरूप्यकैः दातुं सज्जः भवति।

ii. माता ग्राहमञ्चविषये कथयति।

iii. माता कर्कटिकानां मूल्यं पृच्छति।

iv. विक्रेता परिमाणस्थाने पाषाणखण्डं योजयति।

उत्तर: **i. माता कर्कटिकानां मूल्यं पृच्छति।**

**ii. शाकविक्रेता कर्कटिकाः पञ्चसप्ततिरूप्यकैः दातुं सज्जः भवति।**

**iii. विक्रेता परिमाणस्थाने पाषाणखण्डं योजयति।**

**iv. माता ग्राहकमञ्चविषये कथयति।**

२. कर्तृपदानि तथा कृतयःच संयोजयत।

| | |
|---|---|
| माता | i. परिमाणस्थाने पाषाणखण्डं योजयति। |
| | ii. सत्यं वदति। |
| मधुरा | iii. सम्यक् न तोलयति। |
| | iv. रङ्गमञ्चविषये श्रुतवती। |
| शाकविक्रेता | v. कर्कटिकानां मूल्यं पृच्छति। |
| | vi. ग्राहकमञ्चम् अभिगच्छामि इति सूचयति। |

उत्तर:

**माता**
- **i. कर्कटिकानां मूल्यं पृच्छति।**
- **ii. ग्राहकमञ्चम् अभिगच्छामि इति सूचयति।**

**मधुरा**
- **iii. सत्यं वदति।**
- **iv. रङ्गमञ्चविषये श्रुतवती।**

**शाकविक्रेता**
- **v. परिमाणस्थाने पाषाणखण्डं योजयति।**
- **vi. सम्यक् न तोलयति।**

## शब्दज्ञानम्।

### अ. गद्यांशे पर्यायशब्दं चिनुत।

| | | | |
|---|---|---|---|
| *१. | महामूल्याः , मूल्यवन्तः ,बहुमूल्याः | = | **महार्घाः।** |
| *२. | विपणिः (दुकान) | = | **आपणः।** |
| *३. | क्रेता, वस्तुक्रेता | = | **ग्राहकः।** |
| *४. | माता, जननी, प्रसूः, जन्मदात्री | = | **अम्बा।** |
| ५. | निदाघः , निदाघकालः (उन्हाळा) | = | **ग्रीष्मकालः।** |
| ६. | योग्यम् , उचितम् | = | **सम्यक्।** |
| ७. | दृष्टम् , विलोकितम् | = | **अवलोकितम्।** |
| ८. | खण्डितः, भग्नः | = | **त्रुटितः।** |

### ब. गद्यांशे विपरितार्थकशब्दं चित्वा लिखत।

| | | | |
|---|---|---|---|
| १. | अल्पार्घाः, अल्पमूल्याः | × | **महार्घाः।** |
| २. | अनन्तरम्, तदानीम् | × | **अधुना।** |
| ३. | गृह्णामि | × | **ददामि।** |
| ४. | असम्यक् | × | **सम्यक्।** |
| ५. | असत्यम् | × | **सत्यम्।** |
| ६. | अत्रुटितः, अखण्डित | × | **त्रुटितः।** |
| ७. | क्रयः (खरेदी) | × | **विक्रयः।** (विक्री) |

क. **चतुर्थपदं लिखत।**

१. त्वम् : जानासि :: भवती : ______

**उत्तर:** त्वम् : जानासि :: भवती : **जानाति**

२. ज्ञा : जानासि :: भू-भव् : ______

**उत्तर:** ज्ञा : जानासि :: भू-भव् : **भवसि**

३. भू-भव् : भवसि :: वद् : ______

**उत्तर:** भू-भव् : भवसि :: वद् : **वदसि**

४. दा : ददातु :: अस् : ______

**उत्तर:** दा : ददातु :: अस् : **अस्तु**

५. तुल् : तोलयति :: युज् : ______

**उत्तर:** तुल् : तोलयति :: युज् : **योजयति**

६. अनुज्ञापत्रादपि : अनुज्ञापत्रात् + अपि :: तोलनमपि : ______

**उत्तर:** अनुज्ञापत्रादपि : अनुज्ञापत्रात् + अपि :: तोलनमपि : **तोलनम् + अपि**

७. परिमाण : परिमाणानाम् :: पाषणखण्ड : ______

**उत्तर:** परिमाण : परिमाणानाम् :: पाषणखण्ड : **पाषाणखण्डानाम्**

## ड. भिन्नार्थशब्दानां ज्ञानम्।

**१. 'विधिः' इत्यस्य अर्थः न्यायः (कायदा)/ रीतिः/ पद्धतिः (पद्धत /प्रक्रिया) च।**

i. 'नागरिकैः विधिः रक्षणीयः। ' इति वाक्ये 'विधिः' शब्दस्य अर्थः ________ ।

ii. 'एतस्य कार्यस्य कः योग्यः विधिः?' इति वाक्ये 'विधिः' शब्दस्य अर्थः________ ।

**उत्तरः i.** 'नागरिकैः विधिः रक्षणीयः। ' इति वाक्ये 'विधिः' शब्दस्य अर्थः **न्यायः**।

**ii.** 'एतस्य कार्यस्य कः योग्यः विधिः? ' इति वाक्ये विधिः शब्दस्य अर्थः **रीतिः/ पद्धतिः।**

**२. 'दण्डः' शब्दस्य अर्थः यष्टिः काठी शासनं शिक्षा च।**

i. 'सैनिकस्य हस्ते दण्डः अस्ति।' इति वाक्ये 'दण्डः' शब्दस्य अर्थः ________ ।

ii. 'चौरस्य कृते दण्डः आवश्यकः एव।' इति वाक्ये 'दण्डः' शब्दस्य अर्थः ________ ।

**उत्तरः i.** 'सैनिकस्य हस्ते दण्डः अस्ति।' इति वाक्ये 'दण्डः शब्दस्य अर्थः **यष्टिः**।

**ii.** 'चौरस्य कृते दण्डः आवश्यकः एव।' इति वाक्ये 'दण्डः' शब्दस्य अर्थः **शासनम्**।

## इ. विशेषण-विशेष्य-अन्वितिः।

१. गद्यांशे योग्यानि विशेषण-विशेष्य-युगुलानि चित्वा लिखत।

विशेषणम्-त्रुटितः, महार्घाः, सम्यक्, चिह्नाङ्कितानि

विशेष्यम्-तोलनम् , शाकाः, परिमाणानि, दण्डः




उत्तरः १. **त्रुटितः दण्डः।**

२. **महार्घाःशाकाः।**

३. **सम्यक् तोलनम्।**

४. **चिह्नाङ्कितानि परिमाणानि।**

२. गद्यांशे चतुर्थपदं चित्वा लिखत।

महार्घाः : शाकाः : : चिह्नाङ्कितानि : ______

**उत्तरः** महार्घाः : शाकाः : : चिह्नाङ्कितानि : **परिमाणानि**

**फ. धातुसाधित-अव्ययानां चयनम् (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।**

१. I. गद्यांशे तृतीया-विभक्त्यन्तपदं चित्वा लिखत।

**उत्तर: i. मया।**

II. गद्यांशे सप्तमी-विभक्त्यन्तपदानि चित्वा लिखत।

**उत्तर: i. आपणे। ii. परिमाणस्थाने।**

**iii. स्थाने।**

**ग. समूहेतरपदं चिनुत।**

१. कर्कटिकानाम्, परिमाणानाम्, तोलनम्, वस्तूनाम्

**उत्तर: तोलनम्।**

२. जानाति, ददामि, तोलयति, भवति

**उत्तर: ददामि।**

३. सन्ति, वदसि, जानासि, भवसि

**उत्तर: सन्ति।**

४. त्रुटितः, वञ्चितः, श्रुतः, ददातु

**उत्तर: ददातु।**

५. भवती, मया, अयि, तव

**उत्तर: अयि।**

६. परिमाणम्, त्वम्, उपयोजनम्, तोलनम्

**उत्तर: त्वम्।**

## अवबोधनम्।

**अ. एकवाक्येन उत्तरं लिखत।**

*१. ग्राहकमञ्चः नाम **किम्?**

**उत्तरः** ग्राहकमञ्चः नाम **ग्राहकहिताय ग्राहकसुखाय च स्थापिता संस्था।**

२. ग्राहकमञ्चः **कदा** स्थापितः?

**उत्तरः** ग्राहकमञ्चः **चतुःसप्तनवैकतमे (१९७४) संवत्सरे** स्थापितः।

३. ग्राहकाणां **कः** अधिकारः?

**उत्तरः यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं गन्तुं तस्य** अधिकारः भवति।

४. 'ग्राहकमञ्च' इति संस्थायाः अपरं नाम **किम्?**

**उत्तरः 'ग्राहकपञ्चायत' इति** 'ग्राहकमञ्च' संस्थायाः अपरं नाम वर्तते।

५. ग्राहकमञ्चः **कैः** निर्मितः?

**उत्तरः** ग्राहकमञ्चः **ग्राहकैः** निर्मितः।

६. विधिना **केषाम्** उपयोजनं निषिद्धमस्ति?

**उत्तरः** विधिना **प्लास्टिकस्यूतानाम्** उपयोजनं निषिद्धमस्ति।

७. ग्राहकमञ्च: **किमर्थं** बद्धपरिकर: वर्तते?

**उत्तर:** ग्राहकमञ्च: **ग्राहकहिताय** बद्धपरिकर: वर्तते।

८. माता शाकविक्रेतारं **कस्मिन्** विषये ज्ञापितवती?

**उत्तर:** माता शाकविक्रेतारं **ग्राहकाधिकारविषये** ज्ञापितवती।

९. मातु: समीपे **किं** वर्तते?

**उत्तर:** मातु: समीपे **वस्त्रस्यूत:** वर्तते।

**ब. रिक्तस्थानपूर्तिं कुरुत।**

*१. __________ मञ्च: ________ बद्धपरिकरो वर्तते।
(एतद् / एष:) (ग्राहकहिताय / ग्राहकहितात्)

**उत्तर:** **एष:** मञ्च: **ग्राहकहिताय** बद्धपरिकरो वर्तते।

*२. युक्तमुक्तं________। (भवती / भवता)

**उत्तर:** युक्तमुक्तं **भवता**।

*३. त्वं __________ सम्यक् ________।
(शाकं / पुष्पाणि) (तोलय / तोलयामि)

**उत्तर:** त्वं **शाकं** सम्यक् **तोलय।**

४. ________ गन्तुं तस्य अधिकारो __________।
(ग्राहकन्यायालयं / ग्राहकन्यायालये) (भवति / धावति)

**उत्तर:** **ग्राहकन्यायालयं** गन्तुं तस्य अधिकारो **भवति**।

५. ________ भवती। (गृह्णानि/ गृह्णातु/ गृहाण)

**उत्तर:** **गृह्णातु** भवती।

६. भवती ________ ________ ग्राहकाधिकारविषये।

(मां / मम) (ज्ञापितवान्/ ज्ञापितवती)

**उत्तर:** भवती **मां ज्ञापितवती** ग्राहकाधिकारविषये।

**क. कः कं वदति? तद् लिखत।**

१. ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चः।

**उत्तर: माता मधुरां वदति।**

२. मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय।

**उत्तर: द्वितीयः शाकविक्रेता प्रथमं शाकविक्रेतारं वदति।**

३. युक्तमुक्तं भवता।

**उत्तर: माता द्वितीयं शाकविक्रेतारं वदति।**

४. कथं प्लास्टिस्यूतं ददासि?

**उत्तर: माता प्रथमं शाकविक्रेतारं वदति।**

५. सदैव अवहितचित्ता भव।

**उत्तर: माता मधुरां वदति।**

६. भवती मां ज्ञापितवती ग्राहकाधिकारविषये।

**उत्तर: प्रथमः शाकविक्रेता मातरं वदति।**

**ड. सत्यं वा असत्यं तद् लिखत।**

१. ग्राहकहिताय ग्राहकसुखाय च ग्राहकमञ्चः स्थापितः।

**उत्तरः सत्यम्।**

२. रङ्गमञ्चः ग्राहकहितायैव बद्धपरिकरो वर्तते।

**उत्तरः असत्यम्।**

३. द्वितीयः शाकविक्रेता ग्राहकन्यायालयस्य विषये जानाति।

**उत्तरः सत्यम्।**

४. मातुः समीपे प्लास्टिकस्यूतः वर्तते।

**उत्तरः असत्यम्।**

५. पर्यावरणरक्षणार्थं प्लास्टिकस्यूतानाम् उपयोगः न करणीयः।

**उत्तरः सत्यम्।**

६. 'ISI चिह्नाङ्कितान्येव परिमाणानि योजयामि' इति प्रथमः शाकविक्रेता मात्रे प्रतिश्रुणोति।

**उत्तरः सत्यम्।**

**इ. योग्यं वा अयोग्यं तद् लिखत।**

१. यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि सः ग्राहकन्यायालयं गच्छेत्।

**उत्तरः योग्यम्।**

२. मातुः समीपे वस्त्रस्यूतः वर्तते।

**उत्तरः योग्यम्।**

३. माता प्लास्टिकस्यूतं न स्वीकरोति।

उत्तर: **योग्यम्।**

४. पर्यावरणरक्षणार्थं प्लास्टिकस्यूतानामुपयोग: न करणीय:।

उत्तर: **योग्यम्।**

५. विधिना प्लास्टिकस्यूतानाम् उपयोजनं निषिद्धमस्ति।

उत्तर: **योग्यम्।**

६. ग्राहक: सदैव अवहितचित्त: भवितुम् अर्हति ।

उत्तर: **योग्यम्।**

७. शाकविक्रेता प्लास्टिकस्यूतं ददाति ।

उत्तर: **अयोग्यम्।**

८. शाकविक्रेता 'ISI चिह्नाङ्कितान्येव परिमाणानि योजयामि' इति निश्चयं करोति।

उत्तर: **योग्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. ग्राहकमञ्चस्य आवश्यकताविषये भवत: किं मतम्? माध्यमभाषया स्पष्टीकुरुत।

उत्तर: 'ग्राहकहिताय ग्राहकसुखाय।' हा पाठ आपल्याला विक्रेत्यांकडून केल्या जाणाऱ्या गैरप्रकारांविषयी माहिती देतो, तसेच ग्राहक या नात्याने आपल्याला असणाऱ्या हक्कांविषयी आपले प्रबोधन करतो. 'ग्राहकपंचायत' किंवा 'ग्राहकमंच' या मंचांविषयी हा पाठ आपल्याला महत्त्वाची माहिती देतो.

'ग्राहकमंच' ही १९७४ साली स्थापन झालेली एक संस्था आहे. हा ग्राहकांचा मंच असून 'ग्राहकपंचायत' या नावानेही ओळखला जातो. हा ग्राहकांनी, ग्राहकांसाठी तयार केलेला ग्राहकांचा मंच आहे. हा ग्राहकांच्या कल्याणासाठी स्थापन झालेला आहे. ग्राहकांच्या हक्कांचे संरक्षण करणे, हे या मंचाचे उद्दिष्ट आहे. या हक्कांमध्ये उत्पादनाबद्दलच्या माहितीचा हक्क, निवडीचा हक्क, ग्राहकाला काही समस्या असल्यास तिच्या निरसनाचा हक्क, उत्पादनाबाबत ग्राहक समाधानी नसल्यास तक्रारीचा हक्क, दर्जाचा हक्क आणि योग्य किंमत अदा करण्याचा हक्क यांचा समावेश होतो. एखाद्या ग्राहकाची फसवणूक झाली, तर त्याविरुद्ध लढा देणे त्याच्यासाठी खूप अवघड असते, कारण व्यापाऱ्यांची एकजूट असते. म्हणूनच, ही संस्था ग्राहकांना त्यांच्या हक्कांसाठी लढण्यास पाठिंबा देते. ती ग्राहकांना मार्गदर्शन करते व त्यांच्या हिताचे रक्षण करते.

अशा प्रकारे, ग्राहकांचे फसवणुकीपासून संरक्षण करण्यासाठी व ग्राहकांच्या हितासाठी 'ग्राहकमंच' अनेक

आवश्यक व महत्त्वाची कामे करतो. तसेच या संघटनेमुळे विक्रेत्यांवर नियंत्रण ठेवणे आणि त्यांच्याकडून काही गैरप्रकार घडल्यास त्यांना शासन करणे शक्य होते. असमाधानी ग्राहकांना विक्रेत्याच्या विरोधात न्यायालयाकडे दाद मागण्यातही या मंचाचे साहाय्य होते. अशा प्रकारे 'ग्राहकमंच' ग्राहक व विक्रेत्यांमध्ये समानतेचे वातावरण निर्माण करण्यात आणि त्यांच्यात न्याय्य व शांततामय संबंध प्रस्थापित करण्यात महत्त्वाची भूमिका बजावतो.

२. प्लास्टिकस्यूतानां निषेधविषये भवत: मतं माध्यमभाषया स्पष्टीकुरुत।

**उत्तर:** 'ग्राहकहिताय ग्राहकसुखाय।' या पाठात मधुरा नावाची एक मुलगी, तिची आई आणि एक भाजीविक्रेता यांच्यातील संवाद देण्यात आलेला आहे. हा पाठ आपल्याला ग्राहक म्हणून आपले हक्क आणि कर्तव्ये या दोन्हीविषयी माहिती देतो.

मधुरा आणि तिची आई यांनी भाजीवाल्याकडून काकड्या विकत घेतल्या. योग्य वजने वापरून काकड्यांचे वजन केल्यानंतर, तो त्या काकड्या प्लॅस्टिकच्या पिशवीमध्ये भरू लागला. त्यावेळी मधुराच्या आईने त्याला सांगितले, की प्लॅस्टिकच्या पिशव्यांवर सरकारने बंदी घातली आहे आणि त्याऐवजी आपण कापडी पिशव्यांचा वापर केला पाहिजे. या पिशव्यांवर बंदी घालण्यात आली आहे, कारण या पातळ पिशव्यांचे सहजरीत्या विघटन होत नाही. कोणत्याच पद्धतीने त्यांची विल्हेवाट लावणे शक्य नसते. शिवाय त्यांचे पुनर्चक्रीकरणही होऊ शकत नाही. लोक या पिशव्या एकदा वापरून फेकून देतात. त्यामुळे त्या अनेक ठिकाणी साचून राहतात. अशा साचलेल्या पिशव्यांमुळे सांडपाणी वाहून नेणाऱ्या नाल्यांमध्ये अडथळा निर्माण होतो परिणामी जेव्हा खूप पाऊस पडतो, तेव्हा सगळीकडे पाणी साठते. या पिशव्यांमुळे गटारं आणि पाणी वाहून नेणारे नाले तुंबतात. सरतेशेवटी ते सगळं समुद्राला जाऊन मिळतं आणि समुद्र प्रदूषित होतो. अशा प्रकारे, या पिशव्यांमुळे प्रचंड प्रमाणात प्रदूषण होतं. तसेच, या पिशव्या जाळल्यास त्यातून अतिशय विषारी वायू बाहेर पडतो, ज्यामुळे हवा प्रदूषित होते.

म्हणूनच, प्लॅस्टिकच्या पिशव्यांमुळे पर्यावरणाचे होणारे नुकसान टाळण्यासाठी आपण त्यांचा वापर करणे थांबवले पाहिजे आणि त्या जागी कापडी पिशव्या वापरल्या पाहिजेत. तसेच, सरकारने या पिशव्यांवर घातलेल्या बंदीविषयी आपण इतरांचेही प्रबोधन केले पाहिजे आणि सामूहिकरीत्या त्यांचा वापर टाळला पाहिजे.

## पृथक्करणम्।

१. अधोदत्तान् वाक्यान् घटनाक्रमानुसारं संयोजयत।

i. मधुरा प्लास्टिकस्यूतानाम् उपयोगविषये अवहितचित्ता भवति।

ii. प्रथम: शाकविक्रेता शाकं तोलयित्वा ददाति।

iii. द्वितीय: शाकविक्रेता ग्राहकन्यायालयस्य विषये कथयति।

iv. माता ग्राहकमञ्चस्य विषये कथयति।

**उत्तर: i. माता ग्राहकमञ्चस्य विषये कथयति।**

**ii. द्वितीयः शाकविक्रेता ग्राहकन्यायालयस्य विषये कथयति।**

**iii. प्रथम: शाकविक्रेता शाकं तोलयित्वा ददाति।**

**iv. मधुरा प्लास्टिकस्यूतानाम् उपयोगविषये अवहिताचित्ता भवति।**

२. गद्यांशे ग्राहकमञ्चस्य विषये पठित्वा वृक्षरेखाचित्रं पूरयत।




उत्तर: १. चतु:सप्तनवैकतमे। (१९७४) २. ग्राहकपञ्चायत। ३. ग्राहकाणाम्।
४. ग्राहकै:। ५. ग्राहकार्थम्। ६. ग्राहकहिताय।

## शब्दज्ञानम्।

**अ. गद्यांशे पर्यायशब्दं चिनुत।**

| | | | |
|---|---|---|---|
| *१. | क्रेता, वस्तुक्रेता | = | **ग्राहकः।** |
| २. | वर्षे, अब्दे | = | **संवत्सरे।** |
| ३. | ग्राहकपञ्चायत | = | **ग्राहकमञ्चः।** |
| ४. | सज्जः, वचनबद्धः | = | **बद्धपरिकरः।** |
| ५. | तुष्टः, आनन्दितः | = | **सन्तुष्टः।** |
| ६. | उपयोगः | = | **उपयोजनम्।** |
| ७. | उत्तमम्, सम्यक् | = | **समीचीनम्।** |
| ८. | निरन्तरम् , नित्यम् | = | **सदैव।** |

**ब. गद्यांशे विलोमशब्दं चिनुत।**

| | | | |
|---|---|---|---|
| १. | असन्तुष्टः | × | **सन्तुष्टः।** |
| २. | आगन्तुम् | × | **गन्तुम्।** |
| ३. | दत्त्वा | × | **गृहीत्वा।** |
| ४. | अयुक्तम् | × | **युक्तम्।** |
| ५. | ददातु | × | **गृह्णातु।** |
| ६. | असमीचीनम् | × | **समीचीनम्।** |

**क. चतुर्थपदं लिखत।**

१. ग्राहकहित : ग्राहकहिताय :: ग्राहकसुख : ________

**उत्तरः** ग्राहकहित : ग्राहकहिताय :: ग्राहकसुख : **ग्राहकसुखाय**

२. संस्था : एषा :: मञ्चः : ________

**उत्तरः** संस्था : एषा :: मञ्चः : **एषः**

३. ग्रह् : गृहीत्वा :: तुल् : ______

**उत्तरः** ग्रह् : गृहीत्वा :: तुल् : **तोलयित्वा**

४. तुल् : तोलय :: भू : ______

**उत्तरः** तुल् : तोलय :: भू : **भव**

५. ग्राहक : ग्राहकार्थम् :: पर्यावरण : ______

**उत्तरः** ग्राहक : ग्राहकार्थम् :: पर्यावरण : **पर्यावरणार्थम्**

६. प्लास्टिकनिर्मितः स्यूतः : प्लास्टिकस्यूतः ::
वस्त्रनिर्मितःस्यूतः : ______

**उत्तरः** प्लास्टिकनिर्मितः स्यूतः : प्लास्टिकस्यूतः ::
वस्त्रनिर्मितःस्यूतः : **वस्त्रस्यूतः**

## ड. विशेषण-विशेष्य-अन्वितिः।

१. स्तम्भमेलनं कुरुत।

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | बद्धपरिकरः | अ. | उपयोजनम् |
| ii. | निषिद्धम् | ब. | मञ्चः |
| iii. | चिह्नाङ्कितानि | क. | परिमाणानि |

**उत्तरः i. बद्धपरिकरः मञ्चः।**

**ii. निषिद्धम् उपयोजनम्।**

**iii. चिह्नाङ्कितानि परिमाणानि।**

**इ. धातुसाधित-अव्ययानां चयनम् (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।**

१. गद्यांशे पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्ययं चित्वा लिखत।

**उत्तर: त्वान्त-अव्ययम् -**

**i. गृहीत्वा।**

२. गद्यांशे हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

**उत्तर: तुमन्त-अव्ययम् -**

**i. गन्तुम्।**

३. I. गद्यांशे चतुर्थी-विभक्त्यन्तपदे चित्वा लिखत।

**उत्तर: i. ग्राहकहिताय। ii. ग्राहकसुखाय।**

II. गद्यांशे तृतीया-विभक्त्यन्तपदे चित्वा लिखत।

**उत्तर: i. ग्राहकैः। ii. भवता।**

**फ. समूहेतरपदं चिनुत।**

१. गृहीत्वा, गन्तुम्, तोलयित्वा

**उत्तर: गन्तुम्।**

२. सम्यक्, समीचीनम्, समीपे

**उत्तर: समीपे।**

३. वर्तते, भवति, ददाति, अस्ति

**उत्तर: वर्तते।**

४. अतः, कथम्, सन्तुष्टः, एवम्

**उत्तर: सन्तुष्टः।**

५. ज्ञायते, स्थापिता, सन्तुष्टः, उक्तम्

**उत्तर: ज्ञायते।**

## कृतिपत्रिकायाः तृतीयः विभागः - व्याकरणम्।

### सन्धयः।

| | | | |
|---|---|---|---|
| *१. | ग्राहकहितायैव | = | **ग्राहकहिताय + एव।** |
| *२. | विधिनापि | = | **विधिना + अपि।** |
| ३. | बद्धपरिकरो वर्तते | = | **बद्धपरिकरः + वर्तते।** |
| ४. | युक्तमुक्तम् | = | **युक्तम् + उक्तम्।** |
| ५. | प्लास्टिकस्यूतानामुपयोगः | = | **प्लास्टिकस्यूतानाम् + उपयोगः।** |
| ६. | तेषामुपयोजनम् | = | **तेषाम् + उपयोजनम्।** |
| ७. | निषिद्धमस्ति | = | **निषिद्धम् + अस्ति।** |
| ८. | सदैव | = | **सदा + एव।** |
| ९. | चिह्नाङ्कितान्येव | = | **चिह्नाङ्कितानि + एव।** |

### पदपरिचयः।

**धातवः।**

**वर्तमानकालः।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *१. | तोलयति | तुल – तोल् | १० उ.प. येथे प.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| २. | गच्छतः | गम् – गच्छ् | १ प.प. | वर्तमानकालः | तृतीयः | द्विवचनम् |
| ३. | जानाति | ज्ञा | ९ उ.प. येथे प.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| ४. | अभिगच्छामि | अभि + गम् → गच्छ् | १ प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| ५. | ददामि | दा | ३ उ.प. येथे प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| ६. | वदसि | वद् | १ प.प. | वर्तमानकालः | द्वितीयः | एकवचनम् |
| ७. | सन्ति | अस् | २ प.प. | वर्तमानकालः | तृतीयः | बहुवचनम् |
| ८. | जानासि | ज्ञा | ९ उ.प. येथे प.प. | वर्तमानकालः | द्वितीयः | एकवचनम् |
| ९. | वर्तते | वृत् – वर्त् | १ आ.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| १०. | ददाति | दा | ३ उ.प. येथे प.प. | वर्तमानकालः | तृतीयः | एकवचनम् |

**आज्ञार्थः।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *११. | ददातु | दा | ३ उ.प. येथे प.प. | आज्ञार्थः | तृतीयः | एकवचनम् |
| १२. | अस्तु | अस् | २ प.प. | आज्ञार्थः | तृतीयः | एकवचनम् |
| १३. | तोलय | तुल – तोल् | १० उ.प. येथे प.प. | आज्ञार्थः | द्वितीयः | एकवचनम् |
| १४. | गृह्णातु | ग्रह् | ९ उ.प. येथे प.प. | आज्ञार्थः | तृतीयः | एकवचनम् |
| १५. | भव | भू-भव् | १ प.प. | आज्ञार्थः | द्वितीयः | एकवचनम् |

**कर्मणि।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *१६. | ज्ञायते | ज्ञा | ९ उ.प. | कर्मणि-वर्तमानकालः | तृतीयः | एकवचनम् |
| *१७. | क्षम्यताम् | क्षम् | १ आ.प. | कर्मणि-आज्ञार्थः | तृतीयः | एकवचनम् |

**प्रयोजकम्।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | प्रयोजकम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|---|
| *१८. | योजयति | युज् | ७ उ.प. येथे प.प. | प्रयोजकम् | वर्तमानकालः | तृतीयः | एकवचनम् |
| १९. | योजयामि | युज् | ७ उ.प. येथे प.प. | प्रयोजकम् | वर्तमानकालः | प्रथमः | एकवचनम् |

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | प्रयोजकम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|---|
| *२०. | ज्ञापितवति | ज्ञा | ९ उ.प. | प्रयोजकम् | कर्तरी-भू-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| *२१. | स्थापिता | स्था – तिष्ठ् | १ प.प. | प्रयोजकम् | कर्मणि-भू-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |

## पूर्वकालवाचक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | पूर्वकालवाचकम् |
|---|---|---|---|---|
| *२२. | गृहीत्वा | ग्रह् | ९ उ.प. | त्वान्त - अव्ययम्। |
| २३. | तोलयित्वा | तुल् – तोल् | १० उ.प. | त्वान्त - अव्ययम्। |

## हेत्वर्थक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | हेत्वर्थक – धातुसाधितम् |
|---|---|---|---|---|
| २४. | गन्तुम् | गम् – गच्छ् | १ प.प. | तुमन्त - अव्ययम्। |

## कर्मणि – विध्यर्थक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कर्मणि-विध्यर्थकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| २५. | करणीयः | कृ | ८ उ.प. | कर्मणि-वि -धा-वि. | पुंलिङ्गम् | प्रथमा | एकचवनम् |

## कर्मणि – भूतकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *२६. | वञ्चितः | वञ्च् | १० उ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| २७. | निषिद्धम् | नि + सिध् | ४ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| २८. | अवलोकितम् | अव + लोक् | १ प.प. आणि १० उ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| २९. | त्रुटितः | त्रुट् | ४ प.प. आणि ६ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ३०. | श्रुतः | श्रु → शृ | ५ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ३१. | उक्तम् | वच् | २ प.प. आणि | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | ब्रू | २ उ.प. | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |

## कर्तरि – भूतकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *३२. | संतुष्टः | सम् + तुष् | ४ प.प. अकर्मक धातू | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

## नामानि।

| क्र. | रूपम् | प्रातिपदिकम् | प्रकारः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| *३३. | विक्रेता | विक्रेतृ | ऋकारान्तम् | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ३४. | माता | मातृ | ऋकारान्तम् | स्त्रीलिङगम् | प्रथमा | एकवचनम् |
| ३५. | कर्कटिकानाम् | कर्कटिका | आकारान्तम् | स्त्रीलिङगम् | षष्ठी | बहुवचनम् |
| ३६. | शाकाः | शाक | अकारान्तम् | पुंलिङ्गम् | प्रथमा, सम्बोधनम् | बहुवचनम् |
| ३७. | आपणे | आपण | अकारान्तम् | पुंलिङ्गम् | सप्तमी | एकवचनम् |
| ३८. | अम्ब | अम्बा | आकारान्तम् | स्त्रीलिङगम् | सम्बोधनम् | एकवचनम् |
| ३९. | तुलायाः | तुला | आकारान्तम् | स्त्रीलिङगम् | पञ्चमी, षष्ठी | एकवचनम् |
| ४०. | नाम्ना | नामन् | अन्नन्तम् | नपुंसकलिङ्गम् | तृतीयः | एकवचनम् |
| ४१. | विधिना | विधि | इकारान्तम् | पुंलिङ्गम् | तृतीयः | एकवचनम् |

## सर्वनामानि।

| क्र. | रूपम् | प्रातिपदिकम् | पुरुषवाचकः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| *४२. | अयम् | इदम् | तृतीयपुरुषः | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४३. | मया | अस्मद् | प्रथमपुरुषः | त्रिषु लिङ्गेषु समानम् | तृतीया | एकवचनम् |
| ४४. | मम | अस्मद् | प्रथमपुरुषः | त्रिषु लिङ्गेषु समानम् | षष्ठी | एकवचनम् |
| ४५. | भवता | भवत् | तृतीयपुरुषः | पुंलिङ्गम् | तृतीया | एकवचनम् |
| ४६. | माम् | अस्मद् | प्रथमपुरुषः | त्रिषु लिङ्गेषु समानम् | द्वितीया | एकवचनम् |

**समासपरिचयः।**

| विभक्ति – तत्पुरुषः। | | | | |
|---|---|---|---|---|
| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
| *१. | विधियुक्तः | विधिना युक्तः। (कायद्याने युक्त) | – | तृतीया-तत्पुरुषः। |
| *२. | चिह्नाङ्कितानि | चिह्नैः अङ्कितानि। (चिन्हांनी अंकित) | – | तृतीया-तत्पुरुषः। |
| *३. | ग्राहकाधिकारः | ग्राहकस्य अधिकारः। (ग्राहकाचा अधिकार) | – | षष्ठी-तत्पुरुषः। |
| *४. | पाषाणखण्डम् | पाषाणस्य खण्डः। (दगडाचा तुकडा) | तम्। | षष्ठी-तत्पुरुषः। |
| *५. | वस्त्रस्यूतः | वस्त्रनिर्मितः स्यूतः। (कापडाची पिशवी) | – | मध्यमपदलोपी-कर्मधारयः। |
| *६. | अनुज्ञापत्रम् | अनुज्ञाविषयकं पत्रम्। (परवानगी विषयक पत्र) | – | मध्यमपदलोपी-कर्मधारयः। |
| ७. | ग्राहकार्थम् | ग्राहकेभ्यः इदम्। (ग्राहकांसाठी) | – | चतुर्थी-तत्पुरुषः। |
| ८. | ग्राहकमञ्चः | ग्राहकेभ्यः मञ्चः। (ग्राहकांसाठी मंच) | – | चतुर्थी-तत्पुरुषः। |
| ९. | ग्राहकमञ्च | ग्राहकाणां मञ्चः। (ग्राहकांचा मंच) | – | षष्ठी-तत्पुरुषः। |
| १०. | पर्यावरणरक्षणार्थम् | i. पर्यावरणस्य रक्षणम्। पर्यावरणरक्षणम्। (पर्यावरणाचे रक्षण)<br>ii. पर्यावरणरक्षणाय इदम्। (पर्यावरण रक्षणासाठी) | – | षष्ठी-तत्पुरुषः।<br>चतुर्थी-तत्पुरुषः। |
| ११. | ग्रीष्मकालः | ग्रीष्मस्य कालः। (उन्हाळ्याचा काळ) | – | षष्ठी-तत्पुरुषः। |
| १२. | परिमाणस्थाने | परिमाणस्य स्थानम्। (परिमाणांचे स्थान) | तस्मिन्। | षष्ठी-तत्पुरुषः। |
| १३. | अशीतिरूप्यकाणि | अशीतिः रूप्यकाणि। (ऐंशी रुपये) | – | कर्मधारयः। |
| १४. | प्लास्टिकस्यूतम् | प्लास्टिकनिर्मितः स्यूतः। (प्लॅस्टिकपासून बनवलेली पिशवी) | तम्। | मध्यमपदलोपी-कर्मधारयः। |
| १५. | महार्घाः | महत् विद्यते अर्घ येषां ते। (ज्यांची किंमत जास्त आहे ते) | – | समानाधिकरण-बहुव्रीहिः। |
| १६. | अवहितचित्ता | अवहितं चित्तं यस्याः सा। (ज्याचे मन जागृत आहे तो) | – | समानाधिकरण-बहुव्रीहिः। |